तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान्।।१.१२

tasya sanjanayanharśam kuruvriddhah pitāmahah ।
simhanādam vinadyoccaih ṣankham dadhmau pratāpavān ।।1.12

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्।। १.१३

tatah ṣankhāṣca bheryaṣca paṇavānakagomukhāh ।
sahasaivābhyahanyanta sa ṣabdastumulo'bhavat ।। 1.13

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ।। १.१४

tatah ṣvetairhayairyukte mahati syandane sthitau ।
mādhavh pāṇḍavascaiva divyau ṣankhau pradadhmatuh ।।1.14

पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः।। १.१५

pāncajanyam hriśīkeṣo devadattam dhananjayah ।
pauṇḍram dadhmau mahāṣankham bhīmakarmā vrikodarah ।। 1.15

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ।। १.१६

anantavijayam rājā kuntīputro yudhiśṭhirah ।
nakulah sahadevaṣca sughośamaṇipuśpakau ।। 1.16